### भियः क्रुक्लुकनौ। (१७४/३१५४)

'ञिभी भये' (धा.पा. १०८५), [1]अस्माद् धातोः [2]तच्छीलादिषु कर्तृषु [3]क्रुक्लुकनौ प्रत्ययौ भवतः। भीरुः, भीलुकः।

[२८७] [4]क्रुकन्नपि वक्तव्यः। (म. भा. २. १३५)

भीरुकः॥

### स्थेशभासपिसकसो वरच्। (१७५/३१५५)

'ष्ठा गतिनिवृत्तौ' (धा.पा. ९२९), 'ईश ऐश्वर्ये' (धा.पा. १०२१), 'भासृ दीप्तौ' (धा. पा. ६२४), 'पिसृ पेसृ गतौ' (धा. पा. ७१९, ७२०), 'कस [5]गतौ' (धा. पा. ८६१), [6]एतेभ्यस्तच्छीलादिषु कर्तृषु वरच् प्रत्ययो भवति। स्थावरः। ईश्वरः। भास्वरः। पेस्वरः। [7]विकस्वरः॥

### यश्च यङः। (१७६/३१५६)

'या प्रापणे' (धा.पा. १०५०), अस्माद् [8]यङन्तात् [9]तच्छीलादिषु कर्तृषु वरच् प्रत्ययो भवति। यायावरः॥

### भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्। (१७७/३१५७)

भ्राजादिभ्यः धातुभ्यस्तच्छीलादिषु [10]कर्तृषु क्विप् प्रत्ययो भवति। विभ्राट्, विभ्राजौ, विभ्राजः। भाः, भासौ, भासः। धूः, धुरौ, धुरः। विद्युत्, विद्युतौ, विद्युतः। ऊर्क्, ऊर्जौ, ऊर्जः। पूः, पुरौ, पुरः। जवते[11]र्दीर्घश्च निपात्यते। जूः, जुवौ, जुवः। ग्रावस्तुत्, ग्रावस्तुतौ, ग्रावस्तुतः। किमर्थमिदमुच्यते, यावता 'अन्येभ्योऽपि [12]दृश्यन्ते' (३.२.७५/२९८०), 'क्विप् च' (३.२.७६/२९८३) इति क्विप् सिद्ध एव? ताच्छीलिकैर्बाध्यते। [13]वाऽसरूपविधिर्नास्ति इत्युक्तम्। अथ तु प्रायिकमेतत्[14]। ततस्तस्यैवायं[15] प्रपञ्चः॥

### अन्येभ्योऽपि दृश्यते। (१७८/३१५८)

अन्येभ्योऽपि धातुभ्यः [16]ताच्छीलिकेषु क्विप् प्रत्ययो [17]दृश्यते। [18]युक्। छित्। भित्। [19]दृशिग्रहणं विध्यन्तरोप[20]सङ्ग्रहार्थम्। क्वचिद् दीर्घः, क्वचिद् द्विर्वचनम्, क्वचित् सम्प्रसारणम्। तथा चाह --

[२८८] क्विब्वचिप्रच्छायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं च[21]। (म. भा. २. १३६)

वाक्। शब्दप्राट्। आयतस्तूः। कटप्रूः। जूः। श्रीः। जुग्रहणमत्र[22] नार्थः, भ्राजादि[23]सूत्र एव गृहीतत्वात्।

[२८९] द्युतिगमिजुहोतीनां द्वे च। (म.भा. २. १३६)

दिद्युत्। जगत्।

[२९०] जुहोतेर्दीर्घश्च। (म. भा. २. १३६)

जुहूः।

---

1. इत्यस्मात् अ. 2. तच्छीलादिषु नास्ति फ, कर्तृषु नास्ति ह. 3. क्रुक्लुकन् इत्येतौ फ. 4. भियः इत्यधिकम् अ.ब.क. 5. गतिशासनयोः ह. 6. एभ्यः वरच् प्रत्ययः फ, इत्येतेभ्यः धातुभ्यः अ.ब.क.ह. 7. कस्वरः अ.ब.क.ड. 8. धातोः इत्यधिकम् ब.क.फ.ह. 9. तच्छीलादिषु कर्तृषु नास्ति अ.क.फ.ह. 10. कर्तृषु नास्ति क.फ.ह. 11. दीर्घत्वं च ह. 12. दृश्यते ड. 13. वासरूपविधिश्च ब. क. 14. वावचनम् इत्यधिकम् क, वचनं इत्यधिकम् फ.ह, बाधनं इत्यधिकम् ड. 15. अयं नास्ति फ. 16. ताच्छील्यादिषु ह, कर्तृषु इत्यधिकम् ग. 17. भवति ग.फ. 18. वाक् फ, भिषक् ड. 19. विधिग्रहणं ह. 20. संग्रहणार्थम् फ. 21. च इति ब, भवति इत्यधिकम् क. 22. अत्र नास्ति अ.ब, जुग्रहणमनर्थकम् ह. 23. °सूत्रेण एव फ.